Ex/Sans/PG/2.3/2018

# MASTER OF ARTS EXAMINATION, 2018

(1st Year, 2nd Semester)

## SANSKRIT

### Course : VIII

## [Sanskrit Drama]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

१. उत्तररामचरितस्य प्रथमाङ्के प्राप्तानि राम-सीतयोः दाम्पत्यजीवनस्य सुखस्मृतिमूलकानि चित्राण्युल्लिख्य तेषाम् उपस्थापनेन किं नाटकीयं तात्पर्यं साधितं तद्विचार्यताम्। 1½+6½=8

**अथवा,**

'एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक्पृथगिव श्रयते विवर्तान्।' कस्मिन् प्रसङ्गे इदमुक्तम्? प्रसङ्गेऽस्मिन् कवेः रसभावना कथं प्रकाशिता? 1½+6½=8

२. सप्रसङ्गं सुरगिरा देवनागरीलिप्या च व्याख्येयम्। 4

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यते।।

**अथवा,**

वज्रादपि कठोराणि मृदुनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।।

[*Turn over*]

३. **त्रयः प्रश्नाः** सुरगिरा देवनागर्या लिप्या च समाधेयाः। 1×3=3

(क) जृम्भकास्त्राणां प्रापकानां नामन्युल्लेख्यानि।

(ख) निषादपतिना सह रामस्य कुत्र समागम आसीत्? निषादपत्युर्नाम किम्?

(ग) 'एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसृप्तम्–'एतदि'ति पदेन किं निर्दिष्टम्?

(घ) आत्रेयी अध्ययनाय कुतः कुत्र गता?

(ङ) 'निवृत्तचौलकर्मणोस्तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः।' अत्र 'त्रयीवर्जमितरास्तिस्रो विद्या' — इति वाक्यांशेन का सूचिता?

४. 'वाण्यां स्ताति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः।' केनोक्तमिदम्? वक्तुः चरित्रमवलम्ब्य संक्षिप्तो निबन्धो रचनीयः। पङ्क्तेरस्य नाटकीयं तात्पर्यं लेख्यम्। ½+3½+3=7

**अथवा,**

मृच्छकटिकस्य द्वितीयाङ्के संवाहकमवलम्ब्य समाजचित्रं यथा कविना उपस्थापितं तदालोच्यताम्। 7

५. अधोलिखिताः **चत्वारः प्रश्नाः** सुरगिरा देवनागरीलिप्या च समाधेयाः। 2×4=8

(क) 'वीणा हि नाम असुद्रोत्थितं रत्नम्' — कस्मिन् प्रसङ्गे केनोक्तम्? अनेन कथनेन वक्तुः कः परिचयः लभ्यते?

(ख) 'अदृश्यरूपा चपला जरेव या' — कदा वक्ता इदमुक्तवान्? का चपला जरा इव?

[*Turn over*]

(ग) कर्णपूरकेन कीदृशं महत् कर्म अनुष्ठितम्?

(घ) 'धिगस्तु खलु दारिद्र्यमनिवेदितपौरुषम्' — कस्मिन् प्रसङ्गे केनोक्तमिदम्?

(ङ) 'कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति' — कदा वक्ता इदमुक्तवान्? भूतार्थमिति पदस्य कोऽर्थः?

---